# ॥ वाल्मीकि रामायण ॥

## ७ उत्तरकाण्ड

## अध्याय ४९

दृष्ट्वा तु मैथिलीं सीतामाश्रमं संप्रवेशिताम् ।
सन्तापमकरोद्घोरं लक्ष्मणो दीनचेतनः ॥ १ ॥

अब्रवीच्च महातेजाः सुमन्त्रं मन्त्रसारथिम् ।
सीतासन्तापजं दुःखं पश्य रामस्य धीमतः ॥ २ ॥

अतो दुःखतरं किं नु राघवस्य भविष्यति ।
पत्नीं शुद्धसमाचारां विसृज्य जनकात्मजाम् ॥ ३ ॥

व्यक्तं दैवादहं मन्ये राघवस्य विना भवम् ।
वैदेह्या सारथे सार्धं दैवं हि दुरतिक्रमम् ॥ ४ ॥

यो हि देवान्सगन्धर्वानसुरान्सह राक्षसैः ।
निहन्याद्राघवः क्रुद्धः स दैवमनुवर्तते ॥ ५ ॥

पुरा मम पितुर्वाक्यैर्दण्डके विजने वने ।
उषितो नववर्षाणि पञ्च चैव सुदारुणे ॥ ६ ॥

ततो दुःखतरं भूयः सीताया विप्रवासनम् ।
पौराणां वचनं श्रुत्वा नृशंसं प्रतिभाति मे ॥ ७ ॥

को नु धर्माश्रयः सूत कर्मण्यस्मिन्यशोहरे ।
मैथिलीं प्रति सम्प्राप्तः पौरैर्हीनार्थवादिभिः ॥ ८ ॥

एता बहुविधा वाचः श्रुत्वा लक्ष्मणभाषिताः ।
सुमन्त्रः प्राञ्जलिर्भूत्वा वाक्यमेतदुवाच ह ॥ ९ ॥

न सन्तापस्त्वया कार्यः सौमित्रे मैथिलीं प्रति ।
दृष्टमेतत्पुरा विप्रैः पितुस्ते लक्ष्मणाग्रतः ॥ १० ॥

भविष्यति दृढं रामो दुःखप्रायोऽल्पसुख्यवान् ।
त्वां चैव मैथिलीं चैव शत्रुघ्नभरतौ तथा ।
सन्त्यजिष्यति धर्मात्मा कालेन महता महान् ॥ ११ ॥

न त्विदं त्वयि वक्तव्यं सौमित्रे भरतेऽपि वा ।
राज्ञा वोऽव्याहृतं वाक्यं दुर्वासा यदुवाच ह ॥ १२ ॥

महाराजसमीपे च मम चैव नरर्षभ ।
ऋषिणा व्याहृतं वाक्यं वसिष्ठस्य च संनिधौ ॥ १३ ॥

ऋषेस्तु वचनं श्रुत्वा मामाह पुरुषर्षभः ।
सूत न क्व चिदेवं ते वक्तव्यं जनसंनिधौ ॥ १४ ॥

तस्याहं लोकपालस्य वाक्यं तत्सुसमाहितः ।
नैव जात्वनृतं कुर्यामिति मे सौम्य दर्शनम् ॥ १५ ॥

सर्वथा नास्त्यवक्तव्यं मया सौम्य तवाग्रतः ।
यदि ते श्रवणे श्रद्धा श्रूयतां रघुनन्दन ॥ १६ ॥

यद्यप्यहं नरेन्द्रेण रहस्यं श्रावितः पुरा ।
तच्चाप्युदाहरिष्यामि दैवं हि दुरतिक्रमम् ॥ १७ ॥

तच्छ्रुत्वा भाषितं तस्य गम्भीरार्थपदं महत् ।
तथ्यं ब्रूहीति सौमित्रिः सूतं वाक्यमथाब्रवीत् ॥ १८ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com